



# संस्कृत सोपानम्




लेखक :

अशोक सारस्वत

एम० ए० (संस्कृत), बी० एड०


## सहायक पुस्तिका

## 1-5




Irish BOOKS

# संस्कृत सोपानम्-1

## 1 वर्णज्ञानम्

### अभ्यासकार्यम्

1. क. ii. आ　　ख. ii. त्
　　ग. i. कृ　　घ. ii. न्
2. क. 46 वर्णा:।　　ख. 13 स्वरा:।　　ग. 33 व्यञ्जनानि।
　　घ. अं, अ: (हंस:, प्रात:)।　　ङ. क्ष, त्र।
3. **स्वरा:**　　**अ, इ, उ, ऊ, ऋ, ऐ, ओ, औ।**
　　**व्यञ्जनानि**　　**घ, च, ट, थ, द, ध, म, य।**
4. च् + आ = **चा**　　ब् + उ = **बु**
　　म् + ऋ = **मृ**　　स् + अ = **स**
　　ल् + इ = **लि**　　फ + ऐ = **फै**
　　न् + ऊ = **नू**　　ज् + औ = **जौ**
　　थ् + ई = **थी**　　र् + ए = **रे**
5. क वर्ग **ख्, घ्**　　च वर्ग **च्, छ्**
　　ट वर्ग **ड्, ढ्**　　त वर्ग **थ्, न्**
　　प वर्ग **फ्, भ्**

**क्रियाकलाप:**
विद्यार्थी स्वयं करें।

## 2 संस्कृतवर्णमाला

### अभ्यासकार्यम्

1. क. ii. ऊ　　ख. i. ध　　ग. i. भ　　घ. ii. र
2. क.　　ख.　　ग.　　घ.


इला


झष:


दीप:


जतुका

3.
| | अ | | ब |
|---|---|---|---|
| क. | ऊ | iii. | **ऊर्णा** |
| ख. | ट | ii. | **टङ्किका** |
| ग. | ज | iv. | **जतुका** |
| घ. | औ | i. | **औषधम्** |
| ङ. | ध | iv. | **धनु:** |

**क्रियाकलाप:**
विद्यार्थी स्वयं करें।

## 3 संयुक्त वर्णा:

### अभ्यासकार्यम्

1. क. i. ज्ञ　　ख. ii. विद्या　ग. ii. वर्णविच्छेद:
2. क. द्वयो: व्यञ्जनयो: मेलनं कृत्वा एकीकरणं 'संयुक्त वर्ण:' इति कथ्यते। उदाहरणम्— क् + ष् + अ = क्ष-अक्ष।
　　ख. श् + उ + क् + अ: = शुक:　　ह + अं + स् + अ: = हंस:
　　ग. प्रत्येक: शब्द: केचन वर्णै: मिलित्वा निर्मीयते, परं यदा वयं तान् वर्णान् पृथक् कुर्म: तु सा प्रक्रिया 'वर्णविच्छेद:' इति कथ्यते; तद्यथा—अज: = अ + ज् + अ:।
3. बक: = **ब् + अ + क् + अ:**
　　सारिका = **स् + आ + र् + इ + क् + आ**
　　मयूर: = **म् + अ + य् + ऊ + र् + अ:**
　　नयनम् = **न् + अ + य् + अ + न् + अ + म्**
　　कुक्कुर: = **क् + उ + क् + क् + उ + र् + अ:**
　　विद्यालय: = **व् + इ + द् + य् + आ + ल् + अ + य् + अ:**
4. क. ब् + आ + ल् + अ: = **बाल:**
　　ख. अ + ज् + आ = **अजा**
　　ग. म् + उ + न् + इ = **मुनि**
　　घ. प् + उ + ष् + प् + अ + म् = **पुष्पम्**

**क्रियाकलाप:**
विद्यार्थी स्वयं करें।

## 4 अमात्रिका: मात्रिकाश्च शब्दा:

### अभ्यासकार्यम्

1. क. (ii) पादप:　　ख. (i) गज　　ग. (ii) ौ + ा
2.


तक्षक:


शुक:


वृक:


गज:


नेत्रम्


नौका

3. शक: = शुक:　　वक: = वृक:
　　कपत: = कपोत:　　हस: = हंस:
　　नत्रम् = नेत्रम्　　अज = अजा

**क्रियाकलाप:**
विद्यार्थी स्वयं करें।

## 5 लिङ्गज्ञानम्

### अभ्यासकार्यम्

1. क. (i) मूषक:　　ख. (ii) स्त्रीलिङ्गम्　　ग. (i) मोदकम्
2. मूषक: = **पुंल्लिङ्गम्**　　मक्षिका = **स्त्रीलिङ्गम्**
　　सारिका = **स्त्रीलिङ्गम्**　　नृप: = **पुंल्लिङ्गम्**
　　गृहम् = **नपुंसकलिङ्गम्**　　अजा = **स्त्रीलिङ्गम्**
　　मण्डूक: = **पुंल्लिङ्गम्**　　लूता = **स्त्रीलिङ्गम्**
　　छत्रम् = **नपुंसकलिङ्गम्**　　बक: = **पुंल्लिङ्गम्**
3.


वृषभ:


लूता


सारिका


कदलीफलम्


आम्रम्


छत्रम्

4. मण्डूक: = **मेढक**　　पिपीलिका = **चींटी**
　　कदलीफलम् = **केला**　　वृषभ: = **बैल**
　　लोमशा = **लोमड़ी**　　सारिका = **मैना**
　　काक: = **कौआ**　　पत्रम् = **पत्ता**

**क्रियाकलाप:**
विद्यार्थी स्वयं करें।

## 6 वचनानां ज्ञानम्

### अभ्यासकार्यम्

**1.** क. (ii) उष्ट्रौ  ख. (i) पाटलम्  ग. (ii) चटका:

**2.** क. संस्कृतभाषायां त्रीणि वचनानि भवन्ति; तद्यथा—एकवचनम्, द्विवचनम्, बहुवचनम्।

ख. 'वाटिका:' इति पदं बहुवचनं प्रदर्शयति।

ग. येषां शब्दानां सङ्ख्यायां द्वयो: बोध: भवति, ते 'द्विवचनम्' इति कथ्यन्ते; तद्यथा—रामौ, लते, पत्रे।

**3.**

| | | | |
|---|---|---|---|
| क. | सैनिका: | (iv) | **अनेक सैनिक** |
| ख. | पाटले | (i) | **दो गुलाब** |
| ग. | पादप: | (v) | **पौधा** |
| घ. | चटका | (iii) | **चिड़िया** |
| ङ. | वाटिका: | (ii) | **अनेक बगियाँ** |

**4.**

| | | | | | |
|---|---|---|---|---|---|
| पादपा: | = | **बहुवचनम्** | वाटिके | = | **द्विवचनम्** |
| चटका | = | **एकवचनम्** | छत्रे | = | **द्विवचनम्** |
| उष्ट्र: | = | **एकवचनम्** | पाटले | = | **द्विवचनम्** |

**क्रियाकलाप:**

विद्यार्थी स्वयं करें।

## 7 सर्वनामज्ञानम्

### अभ्यासकार्यम्

**1.** क. (iii) वह  ख. (i) एते

ग. (iii) बहुवचनम्  घ. (ii) क:

**2.** क. **ते** शुका: सन्ति।  ख. **एते** गजा: सन्ति।

ग. **ते** माले स्त:।  घ. **एते** लूते स्त:।

ङ. **ते** पुष्पे स्त:।  च. **एते** फले स्त:।

**3.**

| | (अ) | | (ब) |
|---|---|---|---|
| क. | एष: | (vi) | **अयम्** |
| ख. | एतौ | (iii) | **इमौ** |
| ग. | एषा | (v) | **इयम्** |
| घ. | एते | (i) | **इमे** |
| ङ. | एता: | (ii) | **इमा:** |
| च. | एते | (iv) | **इमे** |

**4.**

| | **अर्थ:** | **लिङ्गम्** | | **अर्थ:** | **लिङ्गम्** |
|---|---|---|---|---|---|
| स: | **वह** | **पुंल्लिङ्गम्** | एष: | **यह** | **पुंल्लिङ्गम्** |
| तौ | **वे दो** | **पुंल्लिङ्गम्** | एतौ | **ये दो** | **पुंल्लिङ्गम्** |
| सा | **वह** | **स्त्रीलिङ्गम्** | एषा | **यह** | **स्त्रीलिङ्गम्** |
| ता: | **वे सब** | **स्त्रीलिङ्गम्** | एता: | **ये सब** | **स्त्रीलिङ्गम्** |
| तत् | **वह** | **नपुंसकलिङ्गम्** | एतत् | **यह** | **नुपंसकलिङ्गम्** |
| तानि | **वे सब** | **नपुंसकलिङ्गम्** | एतानि | **ये सब** | **नपुंसकलिङ्गम्** |

**क्रियाकलाप:**

विद्यार्थी स्वयं करें।

## 8 क्रियाज्ञानम्

### अभ्यासकार्यम्

**1.** क. (ii) वदन्ति  ख. (iii) लिखति  ग. (ii) नमन्ति

घ. (ii) पतत:  ङ. (i) क्रीडत:

**2.**

| | | | | | |
|---|---|---|---|---|---|
| क. | लिख् | = | लिखति | **लिखत:** | लिखन्ति |
| ख. | पठ् | = | **पठति** | पठत: | **पठन्ति** |
| ग. | खाद् | = | खादति | **खादत:** | **खादन्ति** |
| घ. | क्रीड् | = | **क्रीडति** | क्रीडत: | **क्रीडन्ति** |
| ङ. | हस् | = | **हसति** | हसत: | **हसन्ति** |

**3.**

| | **क्रिया** | | **धातु:** |
|---|---|---|---|
| क. | कूदना | (vi) | **कूर्द्** |
| ख. | नमस्कार करना | (iv) | **नम्** |
| ग. | बोलना | (v) | **वद्** |
| घ. | पकाना | (i) | **पच्** |
| ङ. | देखना | (iii) | **दृश्** |
| च. | खेलना | (ii) | **क्रीड्** |

**4.**


गायति


धावत:


गायन्ति


गच्छति


पश्यत:


खादन्ति

**क्रियाकलाप:**

विद्यार्थी स्वयं करें।

## 9 सङ्ख्यावाचि शब्दाः

### अभ्यासकार्यम्

**1.** (क) (iii) द्वे  (ख) (ii) चक्राणि  (ग) (i) सप्त

**2.**

| **पुंल्लिङ्गम्** | **स्त्रीलिङ्गम्** | **नपुंसकलिङ्गम्** |
|---|---|---|
| एक: | **एका** | **एकम्** |
| **द्वौ** | **द्वे** | द्वे |
| **त्रय:** | तिस्र: | **त्रीणि** |

**क्रियाकलाप:**

विद्यार्थी स्वयं करें।

# संस्कृत सोपानम्-2

## 1 कारकपरिचयः

### अभ्यासकार्यम्

1. क. iii. अधिकरणकारकस्य   ख. i. सम्बन्ध
   ग. ii. सप्त   घ. i. करणकारकस्य
2. अपादान = **से ( अलग होने के अर्थ में )**
   करण = **से, के साथ, द्वारा**
   कर्ता = **ने**   अधिकरण = **में, पर**
   कर्म = **को**   सम्प्रदान = **के लिए, को**
3. क. अधिकरण — iv. **में, पे, पर**
   ख. तृतीया — v. **से, के साथ, द्वारा**
   ग. षष्ठी — vi. **का, की, के**
   घ. चतुर्थी — iii. **के लिए, को**
   ङ. द्वितीया — i. **को**
   च. प्रथमा — ii. **ने**
4. क. विभुः कथां पठति।   ख. नेहा पुष्पैः माला रचयति।
   ग. पिमामही भोजनं खादति।   घ. अध्यापिका कथां श्रावयति।
   ङ. सेवकः आम्रम् आनयति।

**क्रियाकलापः**
विद्यार्थी स्वयं करें।

## 2 कर्ताकारकम्

### अभ्यासकार्यम्

1. क. ii. पाठयति   ख. iii. मित्रम्   ग. i. कन्या
2. क. छात्रा हसति।   ख. बालः पठति।   ग. अजा चरति।
   घ. पुष्पं विकसति।   ङ. कोकिला गायति।
3. क. **अध्यापकः** पाठयति।   ख. **मित्रं** लिखति।   ग. **मृगः** धावति।
   घ. **कन्या** नृत्यति।   ङ. **गजः** चलति।
4. क.  ii. **कूजति**
   ख.  iii. **पठति**
   ग.  iv. **विकसति**
   घ.  i. **पतति**
5. क. गजः   ख. अजा   ग. शशकः
   घ. छात्रः   ङ. आरक्षकः

**क्रियाकलापः**
विद्यार्थी स्वयं करें।

## 3 कर्मकारकम्

### अभ्यासकार्यम्

1. क. ii. कथाम्   ख. iii. पत्रिकाम्
   ग. iii. वानरः   घ. i. मृगः
2. क. जनः कार्यालयं गच्छति।   ख. चित्रकारः चित्रं रचयति।
   ग. पितामही ईश्वरं स्मरति।   घ. मुनिः यज्ञं करोति।
   ङ. सिंहः जलं पिबति।
3. क. मुद्रिकाम्   ख. बीजम्   ग. ईश्वरम्
   घ. पत्रिकाम्   ङ. पायसम्
4. क. वानरः फलं — v. **खादति**
   ख. पितामही पत्रिकां — iii. **पठति**
   ग. कृषकः बीजं — i. **वपति**
   घ. सः चित्राणि — ii. **पश्यति**
   ङ. अहं श्लोकं — iv. **स्मरामि**
5. क. माता पत्रिका पढ़ती है।   ख. कहानीकार कहानी लिखता है।
   ग. बंदर फल खाता है।   घ. खरगोश पत्ता खाता है।

**क्रियाकलापः**
विद्यार्थी स्वयं करें।

## 4 करणकारकम्

### अभ्यासकार्यम्

1. क. ii. जलेन   ख. i. दण्डेन
   ग. iii. नासिकया   घ. ii. नेत्राभ्याम्
2. क. राजकुमारः अश्वेन याति।   ख. मृगाः पादैः धावन्ति।
   ग. कृषकः हलेन भूमिं कर्षति।   घ. वयं हस्ताभ्यां नमामः।
3.

| | **शब्दः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|---|
| क. | जलम् | **जलेन** | **जलाभ्याम्** | **जलैः** |
| ख. | माता | **मात्रा** | **मातृभ्याम्** | **मातृभिः** |
| ग. | नासिका | **नासिकया** | **नासिकाभ्याम्** | **नासिकाभिः** |
| घ. | लता | **लतया** | **लताभ्याम्** | **लताभिः** |

4. क. ईश्वर **कृपया** वयं स्वस्थाः स्मः।   ख. रावणः **छलेन** सीताम् अहरत्।
   ग. माता **छुरिकया** शाकं कृन्तति।   घ. बालः **कन्दुकेन** क्रीडति।
5. क. राम मित्र के साथ मेले को जाता है।
   ख. गाय का बछड़ा अपनी माता के साथ घास खाता है।
   ग. वृद्ध डंडे से कुत्ते को पीटता है।
   घ. माली जल से पौधों को सींचता है।

**क्रियाकलापः**
विद्यार्थी स्वयं करें।

## 5 सम्प्रदानकारकम्

### अभ्यासकार्यम्

1. क. iii. बालकाय   ख. ii. माले   ग. i. परोपकाराय
2. क. अम्बा बालाभ्यः दुग्धं यच्छति।   ख. बालः विद्यायै सुखं त्यजति।
   ग. पुस्तकानि ज्ञानाय भवन्ति।   घ. मालाकारः बालाभ्यां माले रचयति।
   ङ. सूर्याय नमः।
3. क. बालः **विद्यायै सुखं** त्यजति।   ख. माता बालकाय **पायसं** ददाति।
   ग. पुस्तकानि **ज्ञानाय** भवन्ति।   घ. मालाकारः **बालाभ्यां माले** रचयति।
4.

| | **'अ' स्तंभ** | | **'ब' स्तंभ** |
|---|---|---|---|
| क. | विद्यायै | iii. | **ज्ञान के लिए** |
| ख. | याचकाय | i. | **याचक के लिए** |
| ग. | सूर्याय | v. | **सूर्य को** |
| घ. | फलेभ्यः | ii. | **फलों के लिए** |
| ङ. | निर्धनाय | iv. | **निर्धन के लिए** |

5. क. सेठ याचक को दूध देता है।   ख. पुस्तकें ज्ञान के लिए होती हैं।

ग. बालक पढ़ने के लिए आते हैं।
घ. बाघ शिकार के लिए घूमता है।

**क्रियाकलापः**
विद्यार्थी स्वयं करें।

## 6 अपादानकारकम्

### अभ्यासकार्यम्

**1.** क. i. गृहात् ख. iii. मेघेभ्यः
ग. ii. कूपात् घ. ii. पुष्पेभ्यः

**2.** क. पत्रं वृक्षात् पतति। ख. महिला पुष्पाणि वाटिकायाः आनयति।
ग. मेघेभ्यः जलं पतति। घ. श्रमिकः काष्ठानि वनात् आनयति।
ङ. बालः कुकुरात् भीतः रुदति।

**3.** क. **लतायाः** पुष्पाणि पतन्ति। ख. वानरः **वृक्षात्** कूर्दति।
ग. अहं **वाटिकायाः** पुष्पाणि आनयामि।
घ. विभा **देवालयात्** प्रसादम् आनयति।
ङ. **पुष्पात्** गन्धः प्रभवति।

**4.**

| | | | | | |
|---|---|---|---|---|---|
| आलयम् | = | **गृहम्** | तरुः | = | **वृक्षः** |
| शिक्षकः | = | **अध्यापकः** | पयोदः | = | **मेघः** |
| सुमनम् | = | **पुष्पम्** | उपवनम् | = | **उद्यानम्** |

**5.**

| | | | | | |
|---|---|---|---|---|---|
| आनयति | = | **लाता है** | पतति | = | **गिरता है** |
| निष्कासयति | = | **निकालती है** | प्रभवति | = | **उत्पन्न होती है** |
| रुदति | = | **रोता है** | जायते | = | **होती है** |

**क्रियाकलापः**
विद्यार्थी स्वयं करें।

## 7 सम्बन्धभावः (षष्ठी विभक्तिः)

### अभ्यासकार्यम्

**1.** क. ii. गङ्गायाः ख. iii. वाटिकायाः
ग. i. बुद्धस्य घ. ii. मकरस्य

**2.** क. गङ्गायाः जलं पवित्रम् अस्ति। ख. पर्वतानां राजा हिमालयः।
ग. भ्रमराः कमलानाम् उपरि गुञ्जन्ति। घ. शशकः वृक्षस्य अधः शेते।
ङ. अश्वस्य बलं प्रसिद्धम्।

**3.**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| पुंल्लिङ्गम् | देवस्य | **देवयोः** | **देवानाम्** |
| | **पादपस्य** | पादपयोः | **पादपानाम्** |
| स्त्रीलिङ्गम् | रमायाः | **रमयोः** | रमानाम् |
| | **वाटिकायाः** | वाटिकयोः | **वाटिकानाम्** |
| नपुंसकलिङ्गम् | पुष्पस्य | **पुष्पयोः** | **पुष्पाणाम्** |
| | **मित्रस्य** | **मित्रयोः** | मित्राणाम् |

**4.** क. इदं **मम** मित्रस्य पुस्तकम् अस्ति। ख. गृहस्य समीपं **मन्दिरम्** अस्ति।
ग. **पुष्पस्य** गन्धः मनोहरति। घ. भीमस्य **बलं** प्रसिद्धम्।
ङ. **वानरः** शाखायाः उपरि उपविशति।

**क्रियाकलापः**
विद्यार्थी स्वयं करें।

## 8 अधिकरणकारकम्

### अभ्यासकार्यम्

**1.** क. ii. तडागे ख. i. नीडेषु ग. iii. उद्याने

**2.** क. मीना: तडागस्य जले तरन्ति।
ख. कमलेषु भ्रमराः उपविशन्ति मधुरं च गुञ्जन्ति।
ग. खगाः वृक्षाणां शाखासु उपविशन्ति।
घ. उद्याने बालाः क्रीडन्ति जनाश्च भ्रमन्ति।
ङ. पुष्पाणि दृष्ट्वा: बालाः आनन्दिताः भवन्ति।

**3.** क. वने एकः **तडागः** अस्ति।
ख. कमलानि **सुन्दराणि** सन्ति।
ग. वृक्षेषु खगानां **नीडानि** सन्ति।
घ. समीपम् एव एकम् **उद्यानम्** अपि अस्ति।
ङ. उद्याने **बालाः** क्रीडन्ति।

**4.** क. पठन्ति ख. पश्यन्ति, भवन्ति
ग. विकसन्ति घ. खादथ ङ. गच्छामि

**5.** क. वने एकः **तडागः** अस्ति। ख. पाटलपुष्पे **भ्रमरः** गुञ्जति।
ग. **नीडे** चटकायाः अण्डानि सन्ति। घ. **उद्याने** बालाः धावन्ति।
ङ. लतासु **पुष्पाणि** विकसन्ति।

**क्रियाकलापः**
विद्यार्थी स्वयं करें।

## 9 सम्बोधनम्

### अभ्यासकार्यम्

**1.** क. iii. प्रविश्य ख. iii. उभे
ग. i. तेषाम् घ. iii. वृक्षेषु

**2.** क. मधुरः विद्यालयम् अतः नागतः यतोहि तस्य गृहे अद्य जन्मोत्सवः अस्ति।
ख. भारतवर्षे षड् ऋतवः भवन्ति; तद्यथा—वसन्त-ग्रीष्म, वर्षा-शरद्-हेमन्त-शिशिर इति।
ग. वसन्तऋतौ वृक्षेषु नवीनानि पत्राणि प्रभवन्ति।
घ. सर्वत्र प्रसन्नता एव प्रसन्नता प्रसरति।
ङ. सदाचारी दुःखं न प्राप्नोति।

**3.** क. किं सर्वे **छात्राः** उपस्थिताः सन्ति?
ख. सर्वे **उपस्थितिं** ब्रवन्तु।
ग. सर्वत्र **प्रसन्नता** एव **प्रसन्नता** प्रसरति।
घ. **आचार्यवर!** वयम् अग्रे किं पठिष्यामः?
ङ. **मातृपितृभक्ति** सर्वदा लाभकारी भवति।

**4.** क. प्रविश्य, सम्बोधयति ख. दृश्यते ग. ब्रवन्ति
घ. अस्ति ङ. वहति च. भवेत

**5.** क. भोः मधुर! एतत पुस्तकम् आनय।
ख. भोः बालकौ! युवां किं पठथः?
ग. भोः छात्राः! अद्य वयम् उद्यानकार्यं करिष्यामः।
घ. श्रीमन्! अहं पत्रं लिखामि।
ङ. वसन्तऋतौ पुष्पेषु भ्रमराः गुञ्जन्ति।

**6.** क. भो! पार्थ! किं दक्षः गृहं **गतः**?
ख. शृणुत, **आम्रेषु** कोकिलाः कूजन्ति।
ग. वसन्तऋतौ सर्वत्र **प्रसन्नता** एव प्रसन्नता दृश्यते।
घ. शाखासु खगाः **कूजन्ति**।
ङ. आचारहीनः सदा **दुःखं** प्राप्नोति।
च. उपवनस्य सौन्दर्यम् **अति** मनोहरम् अस्ति।
छ. सदाचारी **सुखी** भवति।

**क्रियाकलापः**
विद्यार्थी स्वयं करें।

## 10 शरीरम्

### अभ्यासकार्यम्

1. क. iii. शिर: ख. i. नासिकया ग. iii. पादौ
2. क. शरीरस्य पञ्च अङ्गानि सन्ति—शिर:, नयनम्, कर्ण:, हस्त: पादश्च।
   ख. मुखस्य कार्यं भक्षणम् अस्ति।
   ग. दन्तै: भोजनं चर्वाम:।
   घ. मस्तकस्य शोभा ललाटेन, कपोलाभ्यां केशै: च भवति।
   ङ. पादयो: कार्यं चलनम् अस्ति।
3. क. शरीरस्य बहूनि **अङ्गानि** सन्ति। ख. मुखे **दन्ता:** भवन्ति।
   ग. नासिकया वयं **पुष्पाणि जिघ्राम:**। घ. **कर्णाभ्यां** पाठम् आकर्णयाम:।
   ङ. वयं **पादाभ्यां** चलाम:। च. पुष्पै: वयं **देवपूजां** कुर्म:।
4. गाल = **कपोल:** कान = **कर्ण:**
   गर्दन = **ग्रीवा** आँख = **नेत्रम्**
   दाँत = **दन्ता:** पैर = **पाद:**
   माथा = **मस्तकम्** मुँह = **मुखम्**
   पेट = **उदरम्** छाती = **वक्ष:स्थलम्**
5. क. एतानि अङ्गानि अस्माकं सहायकानि सन्ति।
   ख. केशै: मस्तकस्य शोभा भवति।
   ग. शरीरस्य मध्ये उदरम्, वक्ष:स्थलं च स्थिते स्त:।
   घ. वयं नेत्राभ्यां वस्तूनि पश्याम:।
   ङ. अधोभागे पादौ भवत:।

**क्रियाकलाप:**
विद्यार्थी स्वयं करें।

## 11 श्रीराम:

### अभ्यासकार्यम्

1. क. iii. नपुंसकलिङ्गम् ख. ii. सम्प्रदान
   ग. i. द्विवचनम् घ. ii. आसन्
2. क. पाठ: श्रीरामस्य विषये अस्ति।
   ख. चैत्रमासे शुक्लपक्षस्य नवम्यां तिथौ श्रीराम: अजायत।
   ग. ऋषि: वशिष्ठ: श्रीरामस्य कुलगुरु:।
   घ. श्रीरामस्य भ्रातृणां नामानि सन्ति—भरत: लक्ष्मण: शत्रुघ्नश्च।
   ङ. श्रीराम: लङ्केशस्य रावणस्य वधम् अकरोत्।
3. क. इदं **श्रीरामस्य** चित्रम् अस्ति।
   ख. श्रीरामाय **नम:**।
   ग. तस्य मातु: नाम **कौशल्या** आसीत्।
   घ. श्रीरामस्य पुत्रौ **लवकुशौ** आस्ताम्।
   ङ. **विश्वामित्र:** श्रीरामस्य गुरु: आसीत्।
4.

| | **पदम्** | | **विभक्ति:** | **वचनम्** |
|---|---|---|---|---|
| क. | श्रीरामस्य | = | **षष्ठी** | **एकवचनम्** |
| ख. | नवम्याम् | = | **सप्तमी** | **एकवचनम्** |
| ग. | मातृणाम् | = | **षष्ठी** | **बहुवचनम्** |
| घ. | भ्रातर: | = | **प्रथमा** | **बहुवचनम्** |
| ङ. | पुत्रौ | = | **प्रथमा, द्वितीया** | **द्विवचनम्** |

5. क. भो: छात्रा! **पश्यत** एतत् चित्रम्।
   ख. श्रीरामस्य द्वौ पुत्रौ **आस्ताम्**।
   ग. श्रीराम: नवम्यां तिथौ **अजायत**।
   घ. लक्ष्मण: मेघनादस्य वधम् **अकरोत्**।
   ङ. लङ्काया: अधिपति: रावण: **आसीत्**।

**क्रियाकलाप:**
विद्यार्थी स्वयं करें।

## 12 पिपासित: काक:

### अभ्यासकार्यम्

1. क. iii. आस्ताम् ख. ii. पीकर ग. i. प्राप्स्यथ
2. क. काक: वने आसीत्।
   ख. काक: वृक्षाद् वृक्षम्, नगरात् नगरं ग्रामात् ग्रामं च अभ्रमत्।
   ग. आम्, घटे जलं स्वल्पम् आसीत्।
   घ. यदा काक: जलमध्ये बहून् पाषाणखण्डान् अक्षिपत् तदा जलम् उपरि आगतम्।
   ङ. काक: बुद्धिपूर्वकं यत्नेन सफलतां प्राप्नोत्।
3. क. एकदा **ग्रीष्मर्तौ** स: **पिपासया** अति आकुल: अभवत्।
   ख. सहसा स: एकं **घटम्** अपश्यत्।
   ग. घटे जलं **स्वल्पम्** आसीत्।
   घ. **जलं** पीत्वा स: **सन्तुष्ट:** अभवत्।
4. क. अति ख. च ग. सहसा
   घ. शनै: शनै:, उपरि ङ. अपि, तथैव
5. वनम् = **अरण्यम्** आकुल: = **व्याकुल:**
   जलम् = **नीरम्** वृक्ष: = **तरु:**
   काक: = **वायस:** यत्नम् = **प्रयासम्**
   बुद्धि: = **प्रज्ञा** दिवस: = **दिनम्**

**क्रियाकलाप:**
विद्यार्थी स्वयं करें।

## 13 रूपाणि

**उत्तरम्–** विद्यार्थी स्वयं करें।

# संस्कृत सोपानम्-3

## 1 प्रभातवेला

### अभ्यासकार्यम्

1. क. i. भू ख. ii. सूर्य ग. iii. अव्यय
2. क. प्रात:काल: चतुर्वादनं समयात् आरभते।
   ख. प्रभातवेलायां पक्षिण: मधुरेण कलरवेण शान्तं भूमण्डलं संगीतमयं कुर्वन्ति।
   ग. ब्रह्ममुहूर्ते विद्यार्थिन: विद्याम् अधिगच्छन्ति। पठितानां पाठानाम् अभ्यासं कुर्वन्ति बहून् विषयान् च कण्ठीकुर्वन्ति।
   घ. ओषजनवायुना लब्धशक्तय: जना: श्रान्तिं न अनुभवन्ति।
   ङ. अस्माभि: सदैव सूर्योदयात् पूर्वमेव उत्थातव्यम्।
3. क. प्रात:कालिकी **सुषमा** अतीव **रमणीया** भवति।
   ख. सूर्योदयं यावत् च **प्रभातवेला** एव उच्यते।
   ग. प्रभातवेलायां **प्रकृते:** शोभा अपि अति मनोहारिणी भवति।
   घ. युवान: **व्यायामम्** आचरन्ति, शक्तिं **स्वास्थ्यं** च लभन्ते।
   ङ. अस्माभि: सदैव **सूर्योदयात्** पूर्वमेव उत्थातव्यम्।
4. क. रजनी **iii. दिवा**
   ख. प्रात: **iv. संध्या**
   ग. सुगन्ध: **i. दुर्गन्ध:**
   घ. उत्तम: **ii. अधम:**
   ङ. मुदिता: **vi. दु:खिता:**
   च. अथ **v. इति**
5. क. प्रात: कालीन सौन्दर्य बहुत ही रमणीय होता है।
   ख. सूर्योदय तक प्रभात वेला ही कहलाती है।
   ग. प्रभातवेला में प्रकृति की शोभा भी बहुत मनोहारी होती हैं।
   घ. प्रभातवेला में शुद्ध वायु में घूमने से स्वास्थ्य बढ़ता है।
   ङ. हमें हमेशा सूर्योदय से पहले उठना चाहिए।
6. क. भवति = संध्या कालिकी सुषमा अपि मनोहारिणी **भवति**।
   ख. आरभते = ब्रह्ममुहूर्त्त वेलायां चतुर्वादन समयात् **आरभते**।
   ग. उच्यते = सूर्योदय यावत् प्रभातवेलायं एव **उच्यते**।
   घ. कुर्वन्ति = बालका: कोलाहलम् **कुर्वन्ति**।
   ङ. गच्छन्ति = छात्रा: विलयम् गच्छन्ति।
   च. लभन्ते = युवान: व्यायामम् आचरन्ति शक्तिं स्वास्थ्यं च लभन्ते।

**क्रियाकलाप:**
विद्यार्थी स्वयं करें।

## 2 विभिन्ना: पक्षिण:

### अभ्यासकार्यम्

1. क. iii. मयूर: ख. ii. हंस: ग. i. रक्त:
2. क. मयूर: अस्माकं राष्ट्रिय: पक्षी। ख. मयूर: उपवनेषु वसति।
   ग. मयूर: सर्पस्य शत्रु आस्ति। घ. हंसस्य वर्ण: श्वेत: भवति।
   ङ. हंस: मत्स्यान भक्षयति। च. पिक: सुमधुरं कूजति।
   छ. शुक: वाचम् अनुकरोति। ज. शुकस्यचञ्चु लोहित: भवति।
3. क. मयूर: **उपवनेषु** वसति।
   ख. हंस: **सरोवरे** वसति।
   ग. पिकस्य स्वर: **मधुरो** भवति।
   घ. अस्य **कूजनं** सर्वेषां **जनानां चित्तम्** आह्लादयति।
   ङ. अयं **मनुष्यस्य** मित्रम् अस्ति।
4. क. कर्मकारकम् बहुवचनम्
   ख. अधिकरणकारकम् एकवचनम्
   ग. कर्ताकारकम् एकवचनम्
   घ. करणकारकम् एकवचनम्
5. क. अस्य ख. अयम् ग. अस्य घ. एनम्।
6. क. बालिकाया: **नृत्यम्** अतीव शोभनम् आसीत्।
   ख. पिकस्य मधुरा ध्वनि: जनानां चित्तम् **आकर्षति**।
   ग. राम **एव** तत् कार्यं कर्तुं शक्नोति।
   घ. चटकाया: **नीडम्** अति सुन्दरं प्रतीयते।

**क्रियाकलाप:**
विद्यार्थी स्वयं करें।

## 3 गणतन्त्रदिवस:

### अभ्यासकार्यम्

1. क. iii. गणतन्त्रदिवस: ख. i. 1950 तमे वर्षे
   ग. i. भारतद्वारम् उभयत:
2. क. 'प्रजया प्रजायै शासनम्' इदृशीं व्यवस्थां वयं गणतन्त्रदिवसरूपे मानयाम:।
   ख. उत्सवोऽयं प्रतिवर्षं जनवरीमासस्य 26 तमे दिनाङ्के मानयन्ति।
   ग. 1950 तमे ख्रीष्टाब्दे जनवरीमासस्य षड्विंशति दिनाङ्के नवीनसंविधानस्य घोषणा अभवत्।
   घ. राष्ट्रपतिमहोदय: समारोहे चतुर्भि: अश्वै: आकृष्णमाणे रथे उपविश्य आगच्छति।
   ङ. राष्ट्रपतिभवने केन्द्रीये सचिवालये च विद्युद्दीपानां चित्रविचित्रो प्रकाश: भवति।
3. क. अस्माकं देश: **1947 तमे ख्रीष्टाब्दे अगस्तमासस्य पञ्चदशे दिनाङ्के** स्वतन्त्र: अभवत्।
   ख. गणतन्त्रे **राष्ट्रपति:** सर्वोच्च: शासक: भवति।
   ग. तत्र सेना: **प्रजाश्च** तम् अभिनन्दन्ति।
   घ. तस्य आगते राष्ट्रध्वजस्य **आरोहणं** भवति।
   ङ. जना: विविधानि **युद्धोपकरणानि शोभा दृश्यानि** च दृष्ट्वा मोदन्ते।
4. क. करणकारकम् ख. कर्ताकारकम्
   ग. अधिकरणकारकम् घ. सम्बन्ध
   ङ. कर्मकारकम्
5. क. प्रजायै iii. **प्रजा के लिए**
   ख. कथ्यते iv. **कहलाता है**
   ग. देहल्याम् i. **दिल्ली में**
   घ. आरोहणम् v. **फहराना**
   ङ. उभयत: ii. **दोनों ओर**
6. क. श्व: अस्माकं विद्यालये खेल **समारोह:** भविष्यति।
   ख. राष्ट्रपते: आगते ध्वजस्य **आरोहण:** भवति।
   ग. ह्य: **रात्रौ** चन्द्रचन्द्रिका देदीप्यमाना आसीत्।
   घ. मम हरिद्वारस्य **यात्रा** सफला अभवत्।
   ङ. गणतन्त्रे राष्ट्रपति: **सर्वोच्च:** शासक: अस्ति।

**क्रियाकलाप:**
विद्यार्थी स्वयं करें।

## 4 बुद्धिर्बलम्

### अभ्यासकार्यम्

1. क. iii. अव्ययम् ख. ii. भूखा ग. i. आत्मन्
2. क. सिंह: निर्दय: आसीत्।
   ख. सिंहेन नित्यम् अनेकान् पशून् खादनेन दु:खितो भूय सर्वे पशव: सिंह समीपम् अगच्छन्।
   ग. सिंह: कूपे स्व प्रतिबिम्बम् अपश्यत्।

घ. क्रोधेन परिपूर्णः सिंहः अपरं सिंहं हन्तुम् आत्मानं कूपे अक्षिपत्।

ङ. यस्य बुद्धिः तस्य बलम्।

3. क. एकस्मिन् वने **एकः सिंहः** वसति स्म।

ख. शशकः **अति चतुरः** आसीत्।

ग. स मां **अवारयत् खादितुं** च उद्यतः अभवत्।

घ. अस्मिन् कूपे एव **स सिंहः** वसति।

4. क. कस्मिंश्चित् वने एकः भयङ्करः सिंहः वसति स्म।

ख. सः नित्यम् अनेकान् पशून् हत्वा खादति स्म।

ग. एकदा सिंहः क्षुधितः आसीत्।

घ. शशकः बुद्धिबलेन सर्वेषां प्राणिनां रक्षाम् अकरोत्।

5. क. वने एकः चतुरः शशकः **वसति** स्म।

ख. शृगालः शशकं **हन्तुं** तम् अनुधावति।

ग. सिंहः अपरं सिंहं हन्तुम् **उद्यतः** अभवत्।

घ. सिंहः अति **क्षुधितः** आसीत्।

ङ. शृगालः **आत्मानं** वनस्य राजा मन्यते स्म।

**क्रियाकलापः**

विद्यार्थी स्वयं करें।

## 5 सुभाषितानि

### अभ्यासकार्यम्

1. क. iii. सप्तमी ख. i. एकवचनस्य

ग. i. कस्यचित् + रिपुः

2. क. प्रत्येकस्यां परिस्थितौ महतां स्थितिः समं भवति।

ख. कार्यकाले समुत्पन्ने पुस्तकीया विद्या परहस्ते च गतं धनं व्यर्थम्।

ग. यः उत्सवे, सङ्कटे, अकाले, राष्ट्रविद्रोहे, राजद्वारे श्मशाने च सहैव तिष्ठति स एव बन्धुः।

घ. व्यवहारेण मित्राणि रिपवश्च जायन्ते।

ङ. मणिना वलयेन च करः विभाति।

3. क. उदेति **सविता ताम्रः** ताम्र **एवास्तमेति** च।

ख. **कार्यकाले समुत्पन्ने** न सा विद्या न **तद्धनम्**।

ग. राजद्वारे **श्मशाने** च यस्तिष्ठति स **बान्धवः**।

घ. **व्यवहारेण** जायन्ते मित्राणि **रिपवस्तथा**।

ङ. कविना **च विभुर्विभुना कविः कविना विभुना** च विभाति **सभा**।

4. क. परहस्तगतं धनं सुरक्षितं न <u>तिष्ठति</u>। **तिष्ठति**

ख. दुर्भिक्षे राष्ट्रविप्लवे च यः <u>तिष्ठति</u> स एव बान्धवः। **तिष्ठति**

ग. सविता ताम्रः <u>उदेति</u>। **उदेति**

घ. कविना विभुना च सभा <u>विभाति</u>। **विभाति**

ङ. मित्राणि रिपवश्च व्यवहारेण <u>जायन्ते</u>। **जायन्ते**

5. क. **विद्या**हीनः जनः पशु इव।

ख. यः **दुर्भिक्षे** सह तिष्ठति स एव बन्धुः।

ग. **कविना** राज्ञा चैव विभाति सभा।

घ. न **कश्चित्** अपि कस्यापि मित्रं शत्रु वा भवति।

ङ. सेवकः राज्ञः समक्षं **करः** बद्ध्वा स्थितः अस्ति।

6. क. सूर्य लाल रंग का उदित होता है और लाल ही अस्त होता है।

ख. किसी कार्य के उत्पन्न होने पर न वह विद्या न वह धन किसी लाभ का।

ग. राजदरबार और श्मशान में जो साथ रहता है वह बंधु है।

घ. मित्र तथा शत्रु व्यवहार से बनते हैं।

**क्रियाकलापः**

विद्यार्थी स्वयं करें।

## 6 चतुरः काकः

### अभ्यासकार्यम्

1. क. ii. अस् ख. iii. तुमन् ग. i. षष्ठी

2. क. काकः रोटिकाखण्डं खादितुम् आरब्धवान्।

ख. काकात् रोटिकाखण्डं प्राप्तुं शृगालः उपायं चिन्तितवान्।

ग. शृगालः उक्तवान् यत् भवान् पक्षिषु अतीव सुन्दरः वर्णेन च आकर्षकः अस्ति। भवतः स्वरोऽपि मधुरः। भवान् सुन्दरं गायति अतः एकं गीतं गायतु।

घ. स्वकीयां प्रशंसां श्रुत्वा काकः झटिति रोटिकाखण्डं स्व पादयोः अधः स्थापयति।

ङ. स्व दुष्टतायाः आवरणे अवतरिते शृगालः ततः पलायितः।

3. क. एकः **काकः** आसीत्।

ख. सः काकस्य **मुखे रोटिकाखण्डं** दृष्टवान्।

ग. भवतः वर्णः तु अतीव **आकर्षकः**।

घ. कृपया एकं **गीतं** गायतु।

ङ. शृगालः **शिरः अवनम्य** ततः पलायितः।

4. क. एतत् + अर्थम् = **एतदर्थम्**

ख. पुनः + च = **पुनश्च**

ग. अति + इव = **अतीव**

घ. अति + अन्तम् = **अत्यन्तम्**

ङ. अस्मिन् + अपि = **अस्मिन्नपि**

च. दुर् + जनः = **दुर्जनः**

5. क. काकः रोटिकां प्राप्तुं **पुनः** उड्डयति।

ख. शृगालः रोटिकां प्राप्तुम् **उपायं** चिन्तयति।

ग. **मम** वार्तां ध्यानेन शृणु।

घ. मह्यं **वचनं** देहि यत् त्वं सदा सत्यं वदिष्यसि।

**क्रियाकलापः**

विद्यार्थी स्वयं करें।

## 7 विजयादशमी

### अभ्यासकार्यम्

1. क. iii. दशम्याम् ख. i. तुमुन् ग. ii. लट्लकारस्य

2. क. भारतीयाः उत्सवप्रियाः भवन्ति।

ख. आश्विनमासस्य शुक्लपक्षे दशम्यां तिथौ विजयादशम्याः उत्सवस्य आयोजनं भवति।

ग. जनाः श्रीरामं मर्यादायाः, सत्यस्य सदाचारस्य च प्रतीकं मन्यन्ते।

घ. श्रीरामस्य रावणस्योपरि विजयकारणात् अस्य उत्सवस्य प्रवर्तनम् अभवत्।

ङ. रामलीलायां रावणस्य अग्निदाहः भवति?

छ. अस्मिन् दिवसे बङ्गालप्रान्ते शक्तिरूपायाः सिंहवाहिन्याः दुर्गादेव्याः पूजा भवति।

च. विजयादशम्याः उत्सवात् इयं शिक्षा समुपलभ्यते यत् वयं सदा धर्मन्यायमार्गम् अनुसरेम।

ज. मुझे असत्य से सत्य की ओर ले चलो, अन्धकार से प्रकाश की ओर ले चलो।

3. क. नानाविधेषु **भारतीयोत्सवेषु 'विजयादशमी'** विशिष्टोत्सवः अस्ति।

ख. अस्मिन् दिने एव श्रीरामः **रावणस्य** वधम् अकरोत्।

ग. जनाः इमम् उत्सवं **पूर्णेन** उत्साहेन मन्यन्ते।

घ. अयम् उत्सवः **बङ्गालप्रान्ते** दुर्गापूजारूपेण प्रचलितोऽस्ति।

ङ. अतः **धर्माचरणम्** एव वरम्।

4. क. भू ख. मानय् ग. मन्य्

घ. श्रु ङ. कृ

5. क. अस्माकं विद्यालये श्व चित्रप्रतियोगितायाः **आयोजनं** भविष्यति।

ख. कलाकाराः श्रीरामचरितस्य **प्रदर्शनं** कुर्वन्ति।

ग. चलने असमर्थः रुग्णः जनः वृक्षम् **आश्रित्य** उपविशति।

घ. एकः गुणी पुत्रः **वरम्**।

ङ. **श्रूयते** यत् अस्मिन् वारे अस्माकं ग्रामेऽपि विजयादशम्याः उत्सवस्य आयोजनं भविष्यति।

**क्रियाकलापः**

विद्यार्थी स्वयं करें।

## 8 वसन्तऋतुः

### अभ्यासकार्यम्

1. क. ii. सर्वनाम ख. iii. अव्ययपदम् ग. i. उदकम्
2. क. भारतदेशे षट् ऋतवः क्रमानुसारम् आगच्छन्ति।
   ख. वसन्ते पुष्पाणां सौरभस्य प्रसारः भवति।
   ग. वसन्तस्य पर्यायवाचकाः शब्दाः सन्ति—ऋतुराजः, कुसुमाकरः, कुसुमायुधः।
   घ. अस्मिन् ऋतौ दिशः स्वच्छाः भवन्ति।
   ङ. संसक्तपक्षाः अपि भ्रमराः मधुनः स्वादं प्रति अनवरतं स्वानुरागं प्रकटयन्ति।
3. क. तेषु वसन्तः **ऋतुराजः** अस्ति।
   ख. **वसन्तस्य स्वागतं** सर्वे जनाः अति आनन्देन कुर्वन्ति।
   ग. वसन्ते **आकाशः** अति निर्मलः भवति।
   घ. वृक्षेषु **नवपल्लवाः** सर्वेषां मनांसि आकर्षयन्ति।
   ङ. पवनेन **प्रकम्पमानाः लताः** नृत्यन्ति इव प्रतीयन्ते।
4. सु + आगतम् = **स्वागतम्** क्रम + अनुसारम् = **क्रमानुसारम्**
   स्व + अनुरागम् = **स्वानुरागम्** कुसुम + आकरः = **कुसुमाकरः**
5. क. वसंत ऋतुराज कहलाता है।
   ख. उनमें वसंत ऋतुराज है।
   ग. वसंत सभी प्राणियों के मन को प्रसन्न करता है।
   घ. वसंत में आकाश बहुत निर्मल होता है।
   ङ. पक्षियों का चहचहाना भी सुखदायक होता है।

**क्रियाकलापः**
विद्यार्थी स्वयं करें।

## 9 भारतीयाः कृषकाः

### अभ्यासकार्यम्

1. क. ii. सूर्योदयात् पूर्वम् ख. i. आधुनिकैः यन्त्रैः
   ग. iii. भारतीय खाद्यनिगमः
2. क. भारतवर्षः कृषिप्रधानः देशः।
   ख. कृषकाः परिश्रमिणः भवन्ति।
   ग. कृषकाः क्षेत्रे गत्वा क्षेत्रं कर्षन्ति जलेन च सिञ्चन्ति।
   घ. कृषकेभ्यः उर्वरकं बीजानि च प्रशासनः ददाति।
   ङ. कृषकाः अन्नादिकम् उत्पादयन्ति येन जनानां रक्षा भवति। अतः एतेषां महत्त्वम् अस्ति।
3. क. ते **बलिवर्दौ** योजयित्वा क्षेत्रं कर्षयन्ति।
   ख. कृषकाः **सूर्योदयात्** पूर्वम् एव **शय्यात्यागं** कुर्वन्ति।
   ग. **कृषिव्यवस्थायै** ऋणव्यवस्था अतीव आवश्यकी वर्तते।
   घ. **ग्रामपञ्चायतसमिति** कृषकेभ्यः बहुकार्यं करोति।
   ङ. एतेषाम् अत्यन्तं **महत्त्वम्** अस्ति।
4. क. भारतीयः = **भ् + आ + र् + अ + त् + ई + य् + अः**
   ख. विपुलम् = **व् + इ + प् + उ + ल् + अ + म्**
   ग. सुविधा = **स् + उ + व् + इ + ध् + आ**
   घ. विक्रयम् = **व् + इ + क् + र् + अ + य् + अ + म्**
   ङ. खरपतवारम् = **ख् + अ + र् + अ + प् + अ + त् + अ + व् + आ + र् + अ + म्**
   च. व्यवस्था = **व् + य् + अ + व् + अ + स् + थ् + आ**
   छ. पूर्वम् = **प् + ऊ + र् + व् + अ + म्**
5.

| | वचनम् | लिङ्गम् |
|---|---|---|
| क. | बहुवचनम् | पुंल्लिङ्गम् |
| ख. | द्विवचनम् | पुंल्लिङ्गम् |
| ग. | एकवचनम् | स्त्रीलिङ्गम् |
| घ. | एकवचनम् | नपुंसकलिङ्गम् |
| ङ. | एकवचनम् | नपुंसकलिङ्गम् |
| च. | बहुवचनम् | पुंल्लिङ्गम् |

**क्रियाकलापः**
विद्यार्थी स्वयं करें।

## 10 विज्ञानस्य चमत्काराः

### अभ्यासकार्यम्

1. क. i. गम् ख. iii. क्त्वा ग. ii. क्त
2. क. वर्तमाने विज्ञानस्य युगम् अस्ति।
   ख. दूरदर्शने वयं गृहे एव स्थित्वा देशविदेशानां समाचारान् प्राप्नुमः, सङ्गीतम् आकर्षयामः, मनोरञ्जनाय चलचित्रनाटकादिकं पश्यामः, विविधाः ज्ञानप्रदाः वार्ताः अवगच्छामः, इत्येवं दूरदर्शनस्य उपयोगः।
   ग. दूरभाषस्य अयमेव लाभः यत् अनेन वयं दूरेषु नगरेषु देशेषु वा स्थितेभ्यः स्वजनेभ्यो अल्पमूल्येन वार्तादिकं कर्तुं शक्नुमः।
   घ. शीतकयन्त्रे वस्तूनि शीतलानि तिष्ठन्ति।
   ङ. रॉकेटयाने उपविश्य जनाः चन्द्रम् अपि गन्तुं शक्नुवन्ति।
3. क. यत्र अपि **दृष्टिः** गच्छति तत्र एव **विज्ञानस्य चमत्कारं** पश्यामः।
   ख. दूरे अन्येषु **नगरेषु देशेषु** वा अपि स्थिताः जनाः **दूरभाषेण** परस्परं **वार्तालापं** कुर्वन्ति।
   ग. **सङ्गीतम्** अपि आकर्णयन्ति।
   घ. अस्य गतिः **वायुयानात्** अपि द्रुततरा अस्ति।
   ङ. चिकित्सायाः क्षेत्रे अपि वयं **विभिन्नान् चमत्कारान्** सर्वत्र पश्यामः।
4.

| | पदम् | | विभक्तिः | लिङ्गम् | वचनम् |
|---|---|---|---|---|---|
| क. | दृष्टिः | = | **प्रथमा** | **स्त्रीलिङ्गम्** | **एकवचनम्** |
| ख. | दूरभाषेण | = | **तृतीया** | **पुंल्लिङ्गम्** | **एकवचनम्** |
| ग. | विदेशानाम् | = | **षष्ठी** | **पुंल्लिङ्गम्** | **बहुवचनम्** |
| घ. | गीतानि | = | **प्रथमा, द्वितीया** | **नपुंसकलिङ्गम्** | **बहुवचनम्** |
| ङ. | समाचारान् | = | **द्वितीया** | **पुंल्लिङ्गम्** | **बहुवचनम्** |
| च. | चिकित्सायाः | = | **पञ्चमी, षष्ठी** | **स्त्रीलिङ्गम्** | **एकवचनम्** |

5. क. अद्य वयं सर्वत्र विज्ञानस्य चमत्कारान् पश्यामः।
   ख. सङ्गणकयन्त्रेण तु सञ्चारक्षेत्रे क्रान्ति आनीता।
   ग. शीतकयन्त्रे खाद्यवस्तूनि चिरं सुरक्षितानि तिष्ठन्ति।
   घ. चलदूरभाषं वयं स्व साकं कुत्रापि नेतुं शक्नुमः।
   ङ. दूरदर्शनेन वयं विविधं ज्ञानं प्राप्नुमः।
   च. समाचारपत्रमपि सञ्चारस्य महत्त्वपूर्णं साधनमस्ति।

**क्रियाकलापः**
विद्यार्थी स्वयं करें।

## 11 पद्य पीयूषम्

### अभ्यासकार्यम्

1. क. ii. कम खाने वाला ख. i. षड् + एते
   ग. iii. अव्ययम् घ. i. विशेषणम्
2. क. काकवत् चेष्टा, बकवत् ध्यानम्, श्वानवत् निद्रा, अल्पभोजी गृहत्यागी च, इत्येतानि पञ्च लक्षणानि सन्ति विद्यार्थिनः।
   ख. अभिवादनस्वभावस्थस्य नित्यं वृद्धोपसेविनः च आयुर्विद्यादिकं वर्धते।
   ग. अधनस्य मित्रं न भवति।
   घ. समुद्रेषु वृष्टिः वृथा अस्ति।
3. क. **काकचेष्टाबको** ध्यानं **श्वाननिद्रा** तथैव च।
   ख. चत्वारि तस्य **वर्धन्ते आयुर्विद्यायशो** बलम्।
   ग. षडेते यत्र **वर्तन्ते तत्र देवः** सहायकृत्।
   घ. अलसस्य कुतो **विद्या अविद्यायाः कुतो धनम्**।
   ङ. वृथा **तृप्तस्य** भोजनम्।
4. क. समर्थाय दानं व्यर्थम् अस्ति।

ख. यदि भवान् सहायतां कर्तुम् इच्छति तु निर्धनस्य करोतु।
ग. अधनस्य कश्चित् मित्रं न भवति।
घ. विद्यार्थी शास्त्रेषु उक्तानां पञ्च लक्षणानाम् अनुसरणं कुर्यात्।
ङ. ईश्वरः तस्यैव सहायता करोति यः स्व सहायता स्वयं करोति।
च. वयं सत्कार्यं कुर्वन् जीवनं यापयेम।

5. क. वृष्टिः iii. **वर्षा**
ख. दिवा v. **दिवसः**
ग. मित्रम् i. **सखा**
घ. नित्यम् iv. **प्रतिदिनम्**
ङ. यशः ii. **कीर्तिः**

6. क. अस्य बालस्य **लक्षणं** तु साधु प्रतीयते।
ख. कमल! **तत्र** मा उपविश।
ग. रतिः **नित्यं** प्रातः भ्रमणाम गच्छति।
घ. एवं जलं **वृथा** मा कुरु।
ङ. ''अधुना **कुतः** आयासि,'' जनकः अपृच्छत्।

7. काकचेष्टा = क्+ा+क्+अ+च्+ए+ष्+ट्+आ
अल्पाहारी = अ+ल्+प्+आ+ह+आ+र+ई
विद्यार्थी = व्+इ+द्+य्+आ+र्+थ्+ई
चत्वारी = च्+आ+त्+व+ा+र+ई

8. च = **और** तथैव = **तभी**
पत्र = **पत्ता** तत्र = **वहाँ**
कुतौ = **कहाँ** वृक्षा = **पेड़**

**क्रियाकलापः**
विद्यार्थी स्वयं करें।

## 12 एकः परिवारः

### अभ्यासकार्यम्

1. क. iii. त्रयः ख. ii. दश ग. i. सप्त
2. क. परिवारः गृहे वसति।
ख. परिवारे पञ्च सदस्याः सन्ति।
ग. कुक्कुरः द्वारे स्थित्वा गृहं रक्षति।
घ. ग्रहाः नव भवन्ति इति शास्त्रवचनम्।
ङ. माता फलानि मोदकानि च आनयति।
3. क. एतत् एकं **गृहम्** अस्ति।
ख. **पितामही** अपि **परिवारेण** सह एतस्मिन् गृहे वसति।
ग. **नव** एकः च **दश** भवन्ति। घ. मम दश **अङ्गुलयः**।
ङ. **अष्ट अष्ट** च षोडश भवन्ति। च. अधुना **पूजाकालः**।
4. क. परिवारः iii. **सदस्याः**
ख. कुक्कुरः i. **गृहरक्षा**
ग. हस्त iv. **अङ्गुलयः**
घ. रावणः v. **मुखानि**
ङ. पूजनम् ii. **फलानि**
5. क. मेरे परिवार में दस सदस्य हैं।
ख. मेरे घर में एक छोटा बगीचा भी है।
ग. मेरी दस उँगलियाँ और दो पैर हैं।
घ. दुकान से पाँच फल लाओ।
ङ. ग्रह नौ होते हैं।
6. पञ्च = **पाँच** नव = **नौ**
सप्त = **सात** षट् = **छः**
दश = **दस** षोडश = **सोलह**
7. एतत् = **एतत्** एकं गृहम् अस्ति।
अत्र = **अत्र** सरोवरः अस्ति।
गृहम् = मम **गृहम्** वृक्षस्य समीपम् अस्ति।
पञ्च = मम गृहे **पञ्च** सदस्या सन्ति।

**क्रियाकलापः**
विद्यार्थी स्वयं करें।

## 13 हरिणकाकौ

### अभ्यासकार्यम्

1. क. i. हरिणमांसम् ख. iii. पाशे
ग. ii. लगुडम् घ. i. पाशम्
2. क. वने हरिणकाकौ न्यवसताम्।
ख. श्रृगालः हरिणेन सह मैत्रीं तस्य मांसं खादितुम् अकरोत्।
ग. पाशे हरिणः अपतत् मित्रेण काकेन च कथितेन उपायेन सः मुक्तः अभवत्।
घ. क्षेत्रपतिना क्षिप्तस्य लगुडस्य तीव्रेण प्रहारेण श्रृगालः मृतः।
3. क. एकदा एकः श्रृगालः **हरिणम्** अपश्यत्।
ख. एकदा सः हरिणं **हरिते क्षेत्रे** अनयत्।
ग. सायं काकः **हरिणस्य अन्वेषणम्** अकरोत्।
घ. सः पाशम् **अपाकर्तुम्** आरभत्।
ङ. **तीव्रेण प्रहारेण** श्रृगालः तत्रैव मृतः।
4. क. निवसति iii. **रहता है**
ख. अपश्यत् v. **देखा**
ग. अनयत् ii. **ले गया**
घ. नियोजितवान् vi. **लगाया**
ङ. विलोक्य i. **देखकर**
च. उत्थाय iv. **उठकर**
5. वने = **अधिकरणकारकम्**
हरिणम् = **कर्मकारकम्**
श्रृगालः = **कर्ता कारकम्**
वेगेन = **करणकारकम्**
प्रच्छन्नस्य = **सम्बन्धः**
क्षेत्रात् = **अपादानकारकम्**
6. क. एकस्मिन् वने बहवः पशुपक्षिणः निवसन्ति स्म।
ख. हरिणकाकयोः मैत्री प्रगाढा आसीत्।
ग. एकः श्रृगालः हरिणम् अपश्यत्।
घ. दुःखितो भूय कृषकः जालम् अप्रसारयत्।
ङ. काकः पाशे बद्धं हरिणम् अपश्यत्।

**क्रियाकलापः**
विद्यार्थी स्वयं करें।

## 14 धेनुः

### अभ्यासकार्यम्

1. क. iii. भारतदेशे ख. iii. उभौ ग. i. इन्धनरूपेण
2. क. धेनोः महत्त्वं मानवजीवने वर्तते।
ख. भारतीयाः धेनुं आदरेण श्रद्धया च पालयन्ति तथा माता इव पूजयन्ति।
ग. वेदेषु, शास्त्रेषु, इतिहासे लोकमान्यतायां च धेनोः विषये वर्णनं प्राप्यते।
घ. धेनोः दुग्धेन निर्मितेन दधितक्रमिष्टान्नघृतमादिना सेवनेन वयं पुष्टाः भवामः।
ङ. धेनोः गोमयस्य गोमूत्रस्य च उपयोगः औषधनिर्माणे, सुगन्धवर्तिकानिर्माणे कीटनाशकद्रव्यनिर्माणे च भवति।
3. क. **भारतीय संस्कृतौ** धेनुः प्रधानः पशुः अस्ति।
ख. भारतीयाः तु एनां **माता** इव पूजयन्ति।
ग. **धेनूनां वत्साः** अस्माकं क्षेत्राणि कर्षन्ति।
घ. सा अस्माकं कृते **दुग्धं** ददाति।
ङ. धेनवः मानवानां सर्वत्र **सन्तु**।

**4.**

| | पदम् | | विभक्तिः | वचनम् | लिङ्गम् |
|---|---|---|---|---|---|
| क. | संस्कृतौ | = | **सप्तमी** | **एकवचनम्** | **स्त्रीलिङ्गम्** |
| ख. | वेदानाम् | = | **षष्ठी** | **बहुवचनम्** | **पुंल्लिङ्गम्** |
| ग. | श्रद्धया | = | **तृतीया** | **एकवचनम्** | **स्त्रीलिङ्गम्** |
| घ. | मानवानाम् | = | **षष्ठी** | **बहुवचनम्** | **पुंल्लिङ्गम्** |
| ङ. | कर्मसु | = | **सप्तमी** | **बहुवचनम्** | **नपुंसकलिङ्गम्** |

**5.** क. भारतीयाः धेनोः आदरेण श्रद्धया च पालनं **कुर्वन्ति**।

ख. भारतीयाः जनाः धेनुं माता इव **पूजयन्ति**।

ग. धेनवः स्व दुग्धादिना अस्मान् **पोषयन्ति**।

घ. जनाः एनां 'गोमाता' इति **कथयन्ति**।

**क्रियाकलापः**

विद्यार्थी स्वयं करें।

## 15 व्याकरणम्

**उत्तरम्–** विद्यार्थी स्वयं करें।

# संस्कृत सोपानम्-4

## 1 महात्मा गान्धिः

### अभ्यासकार्यम्

**1.** क. i. महात्मा गान्धिः   ख. ii. सर्वनाम   ग. i. थे

**2.** क. महात्मा गान्धि भारतस्य स्वतन्त्रतासंग्रामस्य कुशल: सेनापति: आसीत्।

ख. महात्मागान्धिन: जन्म काठियावड़ प्रान्तस्य पोरबन्दर नामके स्थाने अभवत्?

ग. गान्धिमहोदस्य मातु: नाम पुतली देवी पितु च कर्मचन्द गान्धि आसीत्।

घ. गान्धिमहोदयस्य पूर्णनाम मोहनदास कर्मचन्द्र गान्धि इति आसीत्।

ङ. गान्धिमहोदय: स्वजीवने सदैव खादी वस्त्रम् धृतवान्?

च. विदेशं गच्छन् स: प्रतिज्ञाम् अकरोत्–कदापि मदिरापानं न करिष्यामि, मांसं न भक्षयिष्यामि। परनारीं मातृवत् स्वीकरिष्यामि।

**3.** क. अस्माकं देशे अनेके **महापुरुषा:** अभवन्।

ख. मातु: नाम **पुतली देवी** आसीत्।

ग. कदापि **मदिरापानम्** न करिष्यामि।

घ. **आंग्लाधिकारिणा:** तं बहुवारं कारागारे अनयन्।

ङ. अस्य **महापुरुषस्य** प्रयत्नै: भारत: **स्वतन्त्र:** अभवत्।

**4.**

| | | | | | |
|---|---|---|---|---|---|
| अस्माकम् | = | **मम्** | अनेक | = | **एक:** |
| कुशल: | = | **अकुशल:** | महापुरुषा: | = | **सामान्य पुरुषा:** |
| स्वतन्त्रता | = | **परतन्त्रता** | जन्म | = | **मृत्यु** |
| सत्य: | = | **असत्य:** | अहिंसा | = | **हिंसा** |
| विदेशम् | = | **स्वदेशम्** | दु:खित: | = | **सुखित:** |

**5.**

| | | | |
|---|---|---|---|
| महापुरुषेषु | = | **पुंल्लिङ्गम्** | **बहुवचनम्** |
| पितु: | = | **पुंल्लिङ्गम्** | **एकवचनम्** |
| मातु: | = | **स्त्रीलिङ्गम्** | **एकवचनम्** |
| उच्चशिक्षायै | = | **स्त्रीलिङ्गम्** | **एकवचनम्** |
| भारतमातु | = | **स्त्रीलिङ्गम्** | **एकवचनम्** |
| महापुरुषस्य | = | **पुंल्लिङ्गम्** | **एकवचनम्** |
| वैदेशिकानाम् | = | **पुंल्लिङ्गम्** | **बहुवचनम्** |

**6.** क. अस्य जन्म कठियावाड प्रान्तस्य पोरबन्दर नामके स्थाने अभवत्।

ख. गान्धिमहोदय: स्वजीवने सदैव खादीवस्त्रम् धृतवान्।

ग. उच्चशिक्षायै विदेशं गच्छन् स: प्रतिज्ञाम् अकरोत्।

घ. कदापि मदिरापानं न करिष्यामि।

ङ. मासं न भक्षयिष्यामि।

च. परनारीम् मातृवत् स्वीकरिष्यामि।

छ. अमानवीयान् व्यवहारान् दृष्ट्वा गान्धिन: मन: अत्यन्त: दुखित: अभवत्।

**7.** क. अस्माकं देशे अनेके महापुरुषा अभवन्।

ख. स: विश्वस्य वंदनेषु महापुरुषेषु अग्रगण्य: आसीत्।

ग. महात्मा गान्धि मातृपितृभक्त: आसीत्।

घ. कदापि मदिरापानं न करिष्यामि।

ङ. अस्य महापुरुषस्य प्रयत्नै: भारत: स्वतंत्र: अभवत्

**8.**

| | | | |
|---|---|---|---|
| क. | अस्माकम् | = | **अस्माकं** देशे अनेके देशभक्ता: अभवन्। |
| ख. | आसीत् | = | पुरा एक: काक: **आसीत्।** |
| ग. | मातु: | = | गान्धि महोदस्य **मातु:**नाम पुतली देवी आसीत्। |
| घ. | पितु: | = | अस्य **पितु:** नाम कर्मचन्द्र गान्धि आसीत्। |
| ङ. | सदैव | = | **सदैव** सत्यम् वद। |
| च. | करिष्यामि | = | अहम् कदापि मदिरापानं न **करिष्यामि।** |
| छ. | सत्यनिष्ठ: | = | महात्मा गान्धि सत्यनिष्ठ: अहिंसाव्रती च आसीत्। |

**क्रियाकलाप:**

विद्यार्थी स्वयं करें।

## 2 सङ्घे शक्तिः

### अभ्यासकार्यम्

**1.** क. iii. पुत्रा:   ख. iii. नपुंसकलिङ्गम्   ग. ii. अनीयर्

**2.** क. ग्रामस्थस्य पुरुषस्य चत्वार: पुत्रा: कलहं कुर्वन्ति स्म।

ख. स्व पुत्रान् प्रतिदिनं कलहं कुर्वन् दृष्ट्वा स: पुरुष: दु:खित: आसीत्।

ग. पुरुष: चत्वारि काष्ठानि एकत्रितानि कृत्वा क्रमश: सर्वान् पुत्रान् त्रोटितुम् आदिशत्।

घ. सङ्घे शक्ति: कलौयुगे इति लिखितम् गीताशास्त्रे।

ङ. असङ्घठिते भूते सति वृषभा: सिंहस्य भोजनम् अभवन्।

च. परस्परं कदापि कलहं न करणीयम्।

**3.** क. **सङ्घे** शक्ति: भवति।

ख. ते सर्वदा **परस्परं कलहं** कुर्वन्ति स्म।

ग. स वने गत्वा **वृक्षात्** चत्वारि काष्ठानि आनयत्।

घ. क्षणमेकं ते सरलतया तानि **अत्रोटयन्।**

ङ. अत: **असङ्घठिताया:** इदं फलं जातम्।

**4.** क. प्रस्तौमि   ख. आनयत्

ग. त्रोटितुम्, अभवत्   घ. अवगतम्, करिष्याम:

ङ. कृता, अचिन्तयत्

**5.** क. अद्य अहं युष्मान् एकां कथां श्रावयिष्यामि।

ख. एकैकं काष्ठं ते सरलतया अत्रोटयन्।

ग. एकत्रितानि काष्ठानि कोऽपि पुत्र: त्रोटितुं न अशक्नोत्।

घ. चत्वारोऽपि वृषभा: पृथक् पृथक् स्थातुम् आरब्धवन्त:।

ङ. गीताशास्त्रे लिखितमस्ति–एकतायां शक्ति: भवति।

च. मिलित्वा कार्यं करणेन कार्यं शीघ्रं सरलतापूर्वकं च भूयते।

**6.** क. भक्तौ **शक्ति:** भवति।

ख. सदा **परस्परं** स्नेहेन तिष्ठत।

ग. कदापि **कलहं** न करणीयम्।

घ. कृषक: **लगुडं** नीत्वा वेगेन अधावत्।

ङ. **किञ्चित्** मिष्टान्नं मह्यम् अपि देहि।

च. सिंहस्य कुटिलतया वृषभाणां मैत्री **छिन्ना** अभवत्।

**क्रियाकलाप:**

विद्यार्थी स्वयं करें।

## 3 ज्ञानं चेतनायाम्

### अभ्यासकार्यम्

**1.** क. iii. अधिकरण–एकवचनम्   ख. i. भू   ग. iii. न

**2.** क. आचार्य: ज्ञानस्य विषये पाठयति।

ख. अयं श्रेष्ठ:, अयं न, येन तत्वेन च हानिलाभयो: ज्ञानम्, अयं मम अपरस्य वा, किं हितं किं च अहितम् इति ज्ञातुं समर्थो भवति तदेव ज्ञानम् अभिज्ञायते।

ग. चेतनां विना ज्ञानस्य विकासं न भवितुम् अर्हति।

घ. मातापिता आचार्यश्चेति त्रिदेवा:।

**3.** क. तत् ज्ञानं **चेतनायां** निहितम्।

ख. **शुद्धचेतना** एव शुद्धज्ञानं भवति।

ग. **ज्ञानस्योपार्जनाय** गुरो: कृपाया: आवश्यकता भवति।

घ. अस्माकं **त्रिदेवा** एव सम्माननीया: सन्ति।

ङ. अस्माभि: एतेषाम् **आज्ञा सर्वदा** पालनीया।

**4.**

| | | |
|---|---|---|
| क. | कक्षायां सर्वे छात्रा: न आसन्। | **सर्वे** |
| ख. | अद्य अहं साहित्यविषये पाठयिष्यामि। | **अहं** |
| ग. | स एव गुरु: य: अन्धकारात् प्रकाशं प्रति नयति। | **स, य:** |
| घ. | गुरु: अस्मत् कृते ईश्वरसदृश: भवति। | **अस्मत्** |
| ङ. | एतेषाम् आज्ञा सर्वदा पालनीया। | **एतेषाम्** |

**5.** क. गुरो: कृपां विना अस्माकम् अज्ञानान्धकारं दूरं न भवितुं शक्यते।

ख. चेतनाशून्य: मनुष्य: मृतवत् अस्ति।

ग. सर्वे छात्राः सावधानतया शृण्वन्तु।
घ. मातापितागुरुश्च आदरणीयाः भवन्ति।
ङ. शुद्धचेतना एव शुद्धं ज्ञानं भवति।

6.

| | पदम् | | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|---|
| क. | कक्षायाम् | = | **स्त्रीलिङ्गम्** | **सप्तमी** | **एकवचनम्** |
| ख. | हानिः | = | **स्त्रीलिङ्गम्** | **प्रथमा** | **एकवचनम्** |
| ग. | ईश्वरेण | = | **पुंल्लिङ्गम्** | **तृतीया** | **एकवचनम्** |
| घ. | अस्मान् | = | **उभयलिङ्गम्** | **द्वितीया** | **बहुवचनम्** |
| ङ. | अन्धकारात् | = | **पुंल्लिङ्गम्** | **पञ्चमी** | **एकवचनम्** |
| च. | आज्ञायाः | = | **स्त्रीलिङ्गम्** | **पञ्चमी, षष्ठी** | **एकवचनम्** |

7. क. वैभवः सर्वेषु छात्रेषु **श्रेष्ठः** अस्ति।
ख. प्रथमम् ईश्वरेण **चेतना** एव प्रदत्ता।
ग. धनस्य **उपार्जनाय** कदापि अधर्ममार्गं न अनुसरणीयम्।
घ. मातापिता आचार्यश्च **सम्माननीयाः** सन्ति।
ङ. नृपस्य **आज्ञा** अस्ति यत् कोऽपि नगरात् बहिः न गच्छेत्।
च. वर्तमाने तु यः शक्तिधनाभ्यां **समर्थः** स एव नेता भवति।

**क्रियाकलापः**

विद्यार्थी स्वयं करें।

## 4 कलहस्य परिणामः

### अभ्यासकार्यम्

1. क. iii. पशवः ख. ii. अजे ग. i. सङ्घर्षः
2. क. कृषकः स्व पशून् तृणादिकं चारयितुं नयति स्म।
ख. परस्परम् ईर्ष्यायाः कारणेन अजयोः कलहः भवति स्म।
ग. एकस्य वृक्षस्य पतनेन सेतोः निर्माणम् अभवत्।
घ. वेदनया उभे अजे अरोदताम्।
ङ. कलहस्य परिणामः दुःखदः भवति।
3. क. तेषु पशुषु **द्वे अजे** अपि आस्ताम्।
ख. सा नदी ग्रामं **द्विभागयोः** विभजति स्म।
ग. उभे अजे **सेतोः मध्ये** स्थिते अभवताम्।
घ. क्रमेण तयोः **सङ्घर्षः** अभवत्।
ङ. **कलहस्य** परिणामः दुःखदः भवति।

4.

| | | | | |
|---|---|---|---|---|
| क. | निवसति स्म | = | **लङ् लकारः** | **एकवचनम्** |
| ख. | नेष्यति | = | **लृट् लकारः** | **एकवचनम्** |
| ग. | अवहत् | = | **लङ् लकारः** | **एकवचनम्** |
| घ. | गच्छति | = | **लट् लकारः** | **एकवचनम्** |
| ङ. | कुर्यात् | = | **विधिलिङ् लकारः** | **एकवचनम्** |

5.

| | | | | | |
|---|---|---|---|---|---|
| सर्वदा | = | **सदा** | वृक्षः | = | **तरुः** |
| चरणः | = | **पादः** | वेदना | = | **पीडा** |
| पूर्वम् | = | **प्राक्** | नदी | = | **सरित्** |
| कलहः | = | **विवादः** | कृषकः | = | **हलधरः** |
| कालः | = | **समयः** | स्तुतिः | = | **प्रशंसा** |

6. क. कृषकस्य पार्श्वे **केचन** पशवः आसन्।
ख. **प्रायः** तयोः अजयोः कलहः भवति स्म।
ग. तयोः **परस्परं** लेशमात्रमपि स्नेहः नासीत्।
घ. ईर्ष्यायाः **परिणामः** सदा दुःखदायकः भवति।
ङ. सहसा द्वितीया अजा अपि तत्र **आगता** आसीत्।

**क्रियाकलापः**

विद्यार्थी स्वयं करें।

## 5 चतुरः काकः

### अभ्यासकार्यम्

1. क. iii. काकदम्पती ख. ii. सर्पः ग. i. स्वर्णस्य
2. क. काकदम्पती वटवृक्षस्य शाखायाम् अवसताम्।
ख. तस्यैव वृक्षमूले स्थितेन सर्पेन तयोः काकदम्पत्योः शावकाः भक्षिताः आसन् अतः तौ दुःखितौ आस्ताम्।
ग. नद्यां स्नानाय एकः राजपुत्रः आगच्छत्।
घ. काकेन राजपुत्रस्य स्वर्णहारं सर्पस्य बिलस्य उपरि क्षेपणस्य वृत्तान्तं सैनिकाः तम् अकथयन्।
ङ. कठिनमपि कार्यं बुद्धिकौशलेन सम्भवम्।
3. क. **एकस्मिन्** वने **एकः वटवृक्षः** आसीत्।
ख. तस्य वृक्षस्य **शाखायां** स्व शावकैः सह **काकदम्पती** अवसताम्।
ग. तदैव तौ मूले **सर्पम्** अपश्यताम्।
घ. सः स्वकीयं **स्वर्णहारं वस्त्राणाम्** उपरि अस्थापयत्।
4. क. वन में नाना प्रकार के वृक्ष थे।
ख. उस वृक्ष की जड़ में एक साँप भी रहता था।
ग. कौए ने साँप के विनाश के लिए उपाय सोचा।
घ. राजपुत्र के सैनिकों ने यह सब देखा।
ङ. उसके बाद वे दोनों सुख से रहे।

5.

| | | | |
|---|---|---|---|
| क. | बहिरागच्छत् | = | **बहिः + आगच्छत्** |
| ख. | एवमचिन्तयत् | = | **एवम् + अचिन्तयत्** |
| ग. | वस्त्राणामुपरि | = | **वस्त्राणाम् + उपरि** |
| घ. | तदैव | = | **तदा + एव** |
| ङ. | किमपि | = | **किम् + अपि** |
| च. | अतीव | = | **अति + इव** |

**क्रियाकलापः**

विद्यार्थी स्वयं करें।

## 6 स्वामिविवेकानन्दः

### अभ्यासकार्यम्

1. क. ii. कर्तृ ख. iii. एकस्याम् ग. iii. लङ्लकारस्य
2. क. 1863 तमे वर्षे स्वामिविवेकानन्दस्य जन्म अभवत्।
ख. रामकृष्णपरमहंसमहोदयस्य स्पर्शमधिगत्य एषः समाधिस्थः अभवत्।
ग. अस्य भाषणम् आकर्ण्य श्रोतारः अस्य प्रशंसितारः अभवन्।
घ. सः लोकसेवायै 'रामकृष्ण मिशन' इति संस्थायाः स्थापनाम् अकरोत्।
3. क. बाल्यकालादेव सः **अति मेधावी** आसीत्।
ख. बाल्यकाले विवेकानन्दस्य नाम **नरेन्द्रनाथः** आसीत्।
ग. स्वामिविवेकानन्दः स्व **भाषणम्** आरभत्।
घ. स्वामिविवेकानन्दः लोकसेवायै **'रामकृष्णमिशन' इति संस्थायाः** स्थापनामकरोत्।
4. क. <u>सः</u> निखिले विश्वे विख्यातः अस्ति।
ख. <u>तस्य</u> महापुरुषस्य जन्म 1863 तमे वर्षे अभवत्।
ग. <u>तस्मात्</u> क्षणादेव <u>सः</u> <u>तं</u> स्व गुरुम् अमन्यत्।
घ. <u>तस्मिन्</u> सम्मेलने <u>सः</u> भारतस्य प्रतिनिधित्वम् अकरोत्।

5.

| | | | |
|---|---|---|---|
| क. | बाल्यकालादेव | = | **बाल्यकालात् + एव** |
| ख. | स्नातकोऽभवत् | = | **स्नातकः + अभवत्** |
| ग. | परलोकमगच्छत् | = | **परलोकम् + अगच्छत्** |
| घ. | स्पर्शमधिगत्य | = | **स्पर्शम् + अधिगत्य** |
| ङ. | समाधिस्थोऽभवत् | = | **समाधिस्थः + अभवत्** |
| च. | क्षणादेव | = | **क्षणात् + एव** |

6.

| | | | |
|---|---|---|---|
| क. | निर्माणम् | = | **न् + इ + र् + म् + आ + ण् + अ + म्** |
| ख. | संस्कृतिः | = | **स् + अं + स् + क् + ऋ + त् + इ + ः** |
| ग. | रुचिः | = | **र् + उ + च् + इ + ः** |
| घ. | श्रोता | = | **श् + र् + ओ + त् + आ** |
| ङ. | प्रतिनिधिः | = | **प् + र् + अ + त् + इ + न् + इ + ध् + इ + ः** |

7. क. सः न केवलं भारते **अपितु** सम्पूर्णे विश्वे विख्यातः अस्ति।
ख. बाल्याकालात् एव अर्जुनस्य **रुचिः** धनुर्विद्यायाम् आसीत्।

ग. स: परमात्मन: साक्षात्काराय महत् **तप:** अकरोत्।
घ. अस्या: कथाया: **सार:** स्व शब्देषु लिखत।
ङ. तदनन्तरं नरेन्द्रनाथ: तं **स्व** गुरु: अमन्यत।

**क्रियाकलाप:**
विद्यार्थी स्वयं करें।

## 7 सुभाषितानि

### अभ्यासकार्यम्

1. क. iii. तृतीया ख. ii. विधिलिङ्
ग. iii. सत्सङ्गति: घ. i. ह्

2. क. सर्प: वरम्।
ख. सज्जन: शान्तिम् आप्नुयात्।
ग. धर्म: निधनेऽपि अनुयाति।
घ. नीतिज्ञा: निन्दन्तु प्रशंसां वा कुर्वन्तु, धनम् आगच्छेत् पूर्णत: समाप्तं वा भवेत्, मरणम् अद्यैव भवेत् अन्यत् कालान्तरं वा परं धीरपुरुषा: सर्वासु स्थितिषु सममेव तिष्ठन्ति ते न्यायात् पथ: न प्रविचलन्ति; एतादृशी भवति धीराणां स्थिति:।
ङ. सत्सङ्गति: जनानां बुद्धे: जडतां हरति, वाण्यां सत्यतां स्थापयति, माने उन्नतिं करोति पापाद् च निवारयति चेत: प्रसादयित्वा कीर्तिं दिक्षु प्रसारयति।

3. क. सर्प: कालेन **दशति**।
ख. मुक्त: अन्यान् **विमोचयेत्**।
ग. उत्तमा: जना: प्रारभ्य मध्ये न **विरमन्ति**।
घ. लक्ष्मी यथेष्टं **समाविशतु गच्छतु** वा।
ङ. सत्सङ्गति: **कीर्तिं** दिक्षु तनोति।

4.

| | | | | | |
|---|---|---|---|---|---|
| दुर्जन: | = | **सज्जन:** | शान्ति: | = | **अशान्ति:** |
| बद्ध: | = | **मुक्त:** | धर्म: | = | **अधर्म:** |
| निन्दा | = | **प्रशंसा** | न्याय: | = | **अन्याय:** |
| यश: | = | **अपयश:** | सत्सङ्गति: | = | **कुसङ्गति:** |

5. क. अध्ययनशीला एव जीवने सफलतां प्राप्नुवन्ति।
ख. विद्याया: परं नान्यत् अपरं धनम्।
ग. दुर्जन: पदे पदे दशति।
घ. सतां सङ्ग: कल्याणकरं भवति।
ङ. सत्सङ्गति: जीवनं सम्यक् दिशि नयति।
च. धीरपुरुषा: स्व पथ: न प्रविचलन्ति।

6. क. विहाय, भवेत ख. भवति ग. आस्ताम्
घ. अजीवन् ङ. पठनाय, आगत:। च. भवति

7. क. अयं वृक्ष: तु अति **उच्च:** अस्ति।
ख. वृक्षस्य **अध:** पथिक: शेते।
ग. अधुना त्वं **कुत:** आयासि?
